# वैदिक वाङ्मयस्य आलोके सरस्वतीस्वरूपम्

नरेन्द्रकुमारपाण्डेयः

भारतीयपरम्परायां सरस्वत्याः विशिष्टं स्थानम्। वैदिकवाङ्मये सरस्वत्याः मुख्यतः अस्माभिः नदी वाग्देवता चेत्यनयोः रूपेण वर्णनं प्राप्यते। वस्तुतः सरस्वती वैदिकवाङ्मये एका नदी देवी (ऋ 6.49.7), अपरा नदीभिः सह एकं नाम (ऋ. 10.75.5), अन्यया देव्या (ऋ. 1.30.8.) इडया भारत्या च सह अपि (ऋ. 2.3.8) प्रयुज्यते। यजुर्वेदे सरस्वत्याः नाम विभिन्नेष्वर्थेषु प्रयुज्यते यथा- सरसः प्रशंसिता ज्ञानादयो गुणा विद्यन्ते यस्यां सा सर्वविद्या प्रापिका वाक्, विज्ञानवती स्त्री (यजु. 21.49 ) प्रशस्तं सरो विज्ञानं विद्यते यस्याः सा (विदुषी स्त्री) (यजु. 19.83), प्रशस्तज्ञानयुक्ता पत्नी (यजु. 19.82) योगिनी स्त्री ( यजु. 19.93), विदुषी शिक्षिता माता (यजु. 20.64), शास्त्रविज्ञानयुक्ता वाक् (यजु. 20.55), विद्या सुशिक्षिता वागिव पत्नी (यजु. 10.34), विज्ञाननिमित्ता स्त्री (यजु. 21.51 ) प्रशस्तबोधः शिक्षायुक्ता वाणी (यजु. 18.16), प्रशंसिता गृहिणी तथा पुरुषः ( 20.59), सुसंस्कृता वाक् (यजु. 20.84) इत्येभिः स्पष्टं भवति यत् वेदेषु सरस्वती सर्वत्र सुशिक्षित वाक्, विद्यायाः अधिष्ठात्री अथ च नदीरूपेण प्रयुक्ता।

इमं मे गंगे यमुने सरस्वती शुतुद्रि स्तोमं सचता परुष्ण्या।
असिक्न्या मरुद्वृधे वितस्तयार्जीकीये श्रृणुह्या सुषोमया।। ऋग्वेदः- 10.75.5

अस्याः ऋचः आधारेण नाना पावगी अलिखत् यद् इन्द्रः वृत्रं वज्रेण हत्वा सप्तसिन्धून् मुक्तीकृतवान्। अथर्ववेदे 'यो हित्वाहिमरिणात् सप्त सिन्धून्' (अथर्ववेद- 20.34.3) तथा अहन्नहिमरिणात् सप्त सिन्धून् (अथर्ववेद- 20.91.12 ) इत्यनेन आधारेण इन्द्रः वृत्रं हत्वा सप्तनदीः मोचितवान्। सप्त सिन्धून् पदस्य व्याख्यायां सायणस्तु 'गङ्गाद्यानद्यः अर्थः कृतः। अत्र मन्त्रे तु नदीनाम् उल्लेखः विद्यते। सप्त नद्यः काः मन्येरन्निति विवादितविषयः। सम्पूर्णानन्दे गंगा, यमुना, मरुद्वृधा इत्येताः विहाय सप्तनदीनां विषये तावत् कथ्यते। वस्तुतः सप्तसिन्धुप्रदेशः नैव निश्चितः। सायणस्तु नदीपरकम् अर्थं प्रत्यपादयत् किन्तु अनन्तरं सेनापरकः अर्थः - गंगेति लक्ष्यं प्रति

गच्छन्ती, यमुना - नियमानां व्यवस्थायाश्च रक्षित्री, सरस्वती - जल इत्यादीनाम् आवश्यकसामग्रीणां प्रापयित्री, शुतुद्री - सामग्रीसंभरणार्थं तीव्रयानैः सुसज्जितानां यन्त्रोपकरणानां सेना इत्येतान् अर्थान् प्रतिपादितवान्।

अस्यैव मन्त्रस्य अध्यात्मपरकोऽर्थः - गंगे यमुने- हे इडे हे पिगंले, शुतुद्रि परुष्णि सरस्वती - हे शुतुद्री तथा परुष्णी नामाभिधेया सुषुम्ना नाडी, मे इमं स्तोमम् आसचत - त्वं मदीयं परमेश्वर स्तवनं सेवस्व! मरुद्धृधे अस्तिक्या-हे सुषुम्ने त्वं पिगंलया सह, आर्जीकीये वितस्तया सुषोमया- हे इडे त्वं वितस्ता नामाधेया सुषुम्नया सह मिलिता, आणुहि - मदीयं परमेश्वर स्तवनं श्रृणोहि। शिवस्वरोदये उक्तमंत्रस्य अध्यात्मपरकः अर्थः अनेन प्रकारेण वर्णितः लभ्यते-

नाभिस्थानगकन्दोर्ध्वमंकुरादेव निर्गता द्विसप्ततिः, सहस्राणि देहमध्ये व्यवस्थिताः ॥ ३२ ॥

तासां मध्ये दश श्रेष्ठा दशानां तिस्र उत्तमाः। इडा च पिंगला चैव सषुम्णा च तृतीयका ॥ ३६ ॥

गान्धारी हस्ति जिह्वा च पूजा चैव यशस्विनी। अलम्बुषा कुहुश्चैव शंखिनी दशमी तथा ॥ ३७ ॥

इडा पिंगला सुषुम्णा प्राणमार्गे व्यवस्थिता ॥ ४१ ॥

नाभिस्थानगतकन्दात् उपरि अंकुरः इव ७२००० संख्याकाः नाड्यः याः समग्रे शरीरे व्यवस्थिताः। तासु दश सर्वोच्चाः अथ च तासु दशस्वपि इडा, पिंगला, सुषुम्णा इत्येताः तिस्रः उत्कृष्टाः । शेषाः सप्त- गान्धारी, हस्तिजिह्वा, पूजा, यशस्विनी, अलम्बुष, कुहू, शंखिनी च। उक्तग्रन्थे -

इडा गंगेति विज्ञेया पिगंला यमुना नदी।
मध्ये सरस्वती विद्यात्प्रयागादि समस्तथा॥

एतन्नाम - इडा-गंगा, पिंगला - यमुना अथ च द्वयोर्मध्ये संगमस्थलमेव प्रयागः। यदि वेदस्य शब्दाः यौगिकाः मन्यन्ते तर्हि ते जनस्य स्थानविशेषस्य च संकेतः नदीपरकः तस्यां दशायां अस्यार्थः- गंगा - उत्तमा गतिं गच्छन्ति अनया इति गंगा- अस्यां नाड्यां प्राणान् वशीकृत्य योगी उत्तमगतिं प्राप्नुवन्ति। यमुना- पूरकप्राणायामेन प्राणान् आत्मनि सम्मेलयन्ती शरीरे गतिं कुरुते। अनेन नाडीगतेन

अभ्यासेन योगी चित्तस्थिरतां प्राप्नुवन्ति। सरस्वती-सरसजलवती गच्छति वहति वा - प्रशस्तरसवती सुषुम्णानाडी सरस्वती कथ्यते। वेदेष्वपि अनेकेषु मन्त्रेषु सरस्वती प्रशस्तरसवती मता ।

ऋग्वेदे सरस्वती अनेकस्थलेषु उल्लिखिता। क्वचित् देवीरूपेण, नदी , क्वचिच्च विश्वरूपेति। सप्तममण्डलीये ९५ तमे अथ च ९६ तमे सूक्ते विशिष्टरूपेण एतत् स्वरूपं प्रकाशितम् ।

एषा ऋग्वेदीया एका प्रमुखा नदी । या आधिक्येन वेगवती शक्तिशालिनी च मता- एषा सरस्वती नदी सर्वाधारम् उदकम् आधृत्य वहति। तस्याः अस्माभिः संरक्षणं प्राप्यते । वेगवत्प्रवाहयुक्ता सरस्वती अन्याः सर्वाः नदीः पृष्ठे कृत्वा अग्रे वर्धते काचित् वेगवति रथे समारूढा देवता इव।[1] एषा नदी स्वीयबलशालिभिर्लहरीभिः शिखराणि मृणालमिव त्रोटयति।[2] एषा स्वीयैः शब्दैः पृथ्वीम् आकाशं च पूरयति।[3] एषा च नदीषु सर्वश्रेष्ठा उच्यते- अम्बितमे नदीतमे देवीतमे सरस्वती।[4]
वाजसनेयीसंहितायां मरुतां पत्नी कथिता- सरस्वती योन्यां गर्भमन्तरश्विभ्यां पत्नी सुकृतं विभर्ति।[5] सरस्वती वाक्, अन्नं सोमश्चापि कथ्यते-
वाग् वै सरस्वत्यन्नं सोमस्तमाद्यो वाचा प्रसाभ्यन्नादो इव भवति।[6]
वाजसनेयीसंहितायां सरस्वत्यां पञ्चनदीनां सम्मेलनम् अथ च स्वयं सरस्वत्याः पञ्चशाखानां च उल्लेखः प्राप्यते-

पञ्च नद्यः सरस्वतीमपियन्ति सस्रोतसः। सरस्वती तु पञ्चधा सो
देशेऽभवत्सरित्।।[7]

ताण्ड्यब्राह्मणे सरस्वती पश्चिमदिशम् अभिमुखम् उह्यमान-नदीरूपेण उल्लिखिता- प्रत्यङ्मुखी खलु सरस्वती प्रवहति।[8] ऋग्वेदे अस्याः नद्याः पर्वतान्निसृत्य समुद्रे पततीति विवेचनं प्राप्यते-

"एका चेत्सरस्वती नदीनां शुचिर्यति गिरिभ्य आ समुद्रात्।[9]

नद्येषा सिरमौरस्य पर्वतेभ्यः निसृत्य अलबद्रीनामके स्थाने प्रकटिता। चालौरनामके स्थाने लुप्ता। पुनः भवानीपुरे प्रकटिता सती बालछप्परनामके स्थाने लुप्ता। पुनः बडाखेडानामके स्थाने प्रकटीभूय पेहोवायाः समीपे उरनीनामके स्थाने मारकण्डायां मिलिता। अथ च घग्घरनामिकायां नद्यां सम्मिलिता। महाभारते सरस्वती यत्र लुप्ता

तत् स्थानं विनशन इति कथ्यते।[10] निषादान् प्रति द्वेषकारणेन सरस्वती अत्र पृथ्व्यां प्रविष्टा।[11] ताण्ड्यमहाब्राह्मणे सरस्वतीविनशने यज्ञः सम्पन्नः इत्यपि उल्लेखो विद्यते।[12]

कुरुक्षेत्रे उह्यमाना सरस्वती नदी प्रतीची प्राची इत्युभयविधनाम्ना स्मर्यते । कुरुक्षेत्रम् आप्लावयनात् परम् एषा नदी पश्चिमाभिमुखी जाता।[13] वामनपुराणस्य भागवतमहापुराणस्य च अनुसारं पृथूदकस्य (पेहोवा) समीपं सरस्वती नदी पूर्वाभिमुखा अभूत्। प्रतिहारराज्यस्य भोजप्रथमस्य पेहोवास्थेन शिलालेखेन ज्ञायते यत् नदी पेहोवातः या वहति सा प्राची सरस्वती। महाभारते पुराणेषु च सरस्वत्याः विभिन्नप्रकारेण स्तुति: कृता वर्तते। अस्य तटे वासः अत्यन्तम् आनन्दायकः। सरस्वतीं सेवित्वा स्वर्गंगताः मानवाः सदा सरस्वतीं स्मरिष्यन्ति।[14]

सरस्वती सर्वासु नदीषु पुण्यशालिनी । सरस्वतीं सेवित्वा जनः इहलोके परलोके च कुकृत्यानि प्रति नैव शोचन्ति।[15] वामनपुराणे सरस्वती विष्णुजिह्वा कथिता।[16] स्कन्दपुराणे ब्रह्मपुत्री बोधिता। सर्वप्रथमं सरस्वती मानवीरूपेण वामनपुराणे उल्लिखिता-

हंस कुन्देन्दु संकाशं बालव्यजनमुत्तमम्।
सरस्वती सरिच्छ्रेष्ठा गजारूढा समादधे।। वामनपुराण-२७.१२

महाभारते पुराणेषु च सरस्वत्याः उद्गमस्रोतः प्लक्षवृक्षः उदीरितम्।[17] प्लक्षवृक्षमूले स्थित्वा मार्कण्डेयेन ऋषिणा कुरुक्षेत्रे सरस्वतीम् आनेतुं स्तुतिर्विहिता तदा एषा कुरुक्षेत्रे प्रविष्टा।[18]

सरस्वत्याः रूपद्वयं वैदिकसरस्वती अनन्तरकालीना सरस्वती च। मैक्समूलरः द्वयमपि मनुते। एषा पञ्चनदस्य पश्चिमीसीमानं विनिर्माति। विभिन्नमतेषु दृष्टिपातेन एषा कुरुक्षेत्रे एव वहतीति सिध्यति।

यजुर्वेदय एकस्मिन् मन्त्रे पञ्चनदीनाम् उल्लेखः प्राप्यते। अस्य आधारेण विद्वान् वेदे पंजाब एतन्नाम प्रदेशविशेषस्य वर्णनं मनुते।

पञ्चनद्यः सरस्वतीमपियन्ति सस्रोतसः।
सरस्वती तु पञ्चधा सो देशोऽभवत्सरित्। यजुर्वेद:-३४.११

एतन्नाम पञ्च नद्य: स्वीयस्रोतोभ्यः सरस्वतीं प्रति यान्ति। सा सरस्वती पञ्चभिः

प्रकारैः तस्मिन् देशे वहति।

एतत् सर्वविदितं यत् सरस्वतीनाम्ना नदी पंजाबे न वहति नैव च पञ्च नद्यः सरस्वत्यां पतन्ति। सरस्वती पञ्चसु धारास्वपि नैव वहति। विद्वद्भिः मन्त्रेषु आगतानि नामानि प्रातिपदिकानि मत्वा यौगिकप्रक्रियानुसारं मंत्रार्थेन ज्ञापितं यत् तस्यां पञ्चभिः ज्ञानेन्द्रियैः प्राप्तं ज्ञानम् अथवा मनसः पञ्चवृत्तीनां स्मृतौ स्थित्वा वाण्या अनेकाभिः विधाभिः अभिव्यक्तिः उल्लिखिता।[19]

सरस्वत्याः उपर्युक्तविवेचनस्य समीक्षा डॉ. राजबली पाण्डेयः अनेन प्रकारेण विहिता यत्- 'सर्वप्रथमम् ऋग्वेदे सरस्वती पवित्र नदी क्रमशः नदी देवता, वाग्देवता इत्येतैः रूपैः वर्णिता। सरस्वती मूलतः शुतुद्री (सतलज) इत्यस्याः एका सहायकनदी। यदा शुतुद्री स्वमार्गं परिवर्त्य विपाशायां (व्यास) मिलिता सरस्वती तस्याः पुरातनपरिवृते उह्यमाना आसीत्। एषा राजस्थानस्य समुद्रे सम्मिलति स्म। महती वेगवती नदी इत्यनेन रूपेण अस्याः वर्णनं प्राप्यते। यस्याः तटे राजानः वसन्ति, यजन्ति मंत्रान् च गायन्ति स्म। सरस्वती अद्यत्वे घग्घर इतिनाम्ना व्यवह्रियते । सरस्वतीदृषद्वत्योर्मध्यवर्ती प्रदेशः ब्रह्मावर्तः । यश्च वैदिकज्ञानाय कर्मकाण्डाय प्रसिद्धः। सरस्वती देवीरूपेण ऋग्वेदे कल्पिता या पवित्रतां, शुद्धिं, समृद्धिं, शक्तिं च प्रददाति। अस्याः सम्बद्धता अन्याभिर्देवताभिः, इन्द्रेण मरुद्भिः सह बोधिता। बहुषु सूक्तेषु सरस्वत्याः सम्बद्धता यज्ञीयदेवताभिः इडा, भारती इत्येताभिः सह युक्ता। पूर्वं भारती सरस्वतीतः अभिन्ना मता।

पूर्वं तु सरस्वती नदी, देवता परन्तु ब्राह्मणकाले[20] तस्याः वाक् (वाग्देवता) इत्यस्मात् अभेदः मतः। परवर्तिनि काले तु सा विद्यायाः कलायाश्च अधिष्ठात्री देवी अभूत्। पुराणेष्वपि सा ब्रह्मपुत्री मता।[21]

निष्कर्षः- कथयितुं शक्यं यत् सरस्वत्याः इतिहासोऽत्यन्तं रहस्यमयः। अद्यापि अनेके विद्वांसः, पुरातत्त्वविभागश्च तद्रहस्योद्घाटने लग्नाः। यस्यां नद्याम् अपारजलराशिः आसीत् सा महावेगवती सहसा कथं लुप्ता। यस्याः तटे सततं साधना, यज्ञः तपस्या च भवति स्म, सा अद्य अनुसन्धातुं विषयत्वेन समुपस्थिता। वेदेषु, ब्राह्मणग्रन्थेषु, पुराणेषु, महाभारते, रामायणे, लौकिके संस्कृतसाहित्ये अन्यविधासु च यस्याः विस्तृतं सारगर्भितं विवेचनं प्राप्यते। सा सरस्वती अद्यापि

गवेषणायाः जिज्ञासायाश्च विषयत्वेन जाता।

## सन्दर्भाः-


1- प्रक्षोदसा धायसा सस्त्र एषा सरस्वती धरुणमायसी पूः
प्रबावधाना रथ्येव याति विश्वा अपो महिना सिन्धुरन्या। ऋग्वेदः-७.९५.१

2- इयं शुष्मेभिर्बिसखा इवारुजत्सानु गिरीणां तविषेभिरुर्मिभिः॥ ऋग्वेदः-६.६.१२

3- आपप्रुषी पार्थिवान्युरु रजो अन्तरिक्षम् सरस्वती निदस्पातु॥ ऋग्वेदः-६.६.११

4- अम्बितमे नदीतमे देवीतमे सरस्वती। ऋग्वेदः-२.४१.१६

5- सरस्वती योन्यां गर्भमन्तरश्विभ्यां पत्नी सुकृतं बिभर्ति। वा सं. १९.९४

6- वाग्वैसरस्वत्यन्नं सोमस्तमाद्यी वाचा प्रसाभ्यन्नादी हेव भवति। वा. सं.-१९.१२ शतपथ ब्राह्मण-३.९.११९.

7- वा० सं. ३४.११

8- ता० ब्रा० २५.१२.१९

9- ऋग्वेद् ७.९५.२

10- ततो विनशनं गच्छेन्नियतो नियताशनः। गच्छत्यन्तर्हिता यत्र मेरूपष्ठे सरस्वती।। वनपर्व-८१.११८

11- द्वारं निषाद राज्ट्रस्य येषां द्वेषात्सरस्वती। प्रविष्टा पृथिवीं वीर मा निषादा हि मां विदुः।। वनपर्व-१३०.४

12- सरस्वत्या विनशने दीक्षन्ते। ताo ब्रा० २५.१०.१

13- कुरुक्षेत्र समाप्लाव्य प्रयाता पश्चिमां दिशाम्॥ वामन सरो० १२.१.२

14- सरस्वतीवास समा कुतो रतिः सरस्वती वास समा कुतो गुणाः।
सरस्वतीं प्राप्य दिवं गता जनाः सदा स्मरिष्यन्ति नदीं सरस्वतीम्।। शल्य०-५४.३८

15- सरस्वती सर्वदीषु पुण्या सरस्वती लोकशुभापरा सदा।
सरस्वतीं प्राप्य जनाः सुदुष्कृतं सदा न शोचन्ति परत्र चेह च।। शल्य० - ५४.३९

16- एवं स्तुता तदा देवी विष्णोर्जिह्वा सरस्वती।।वामन० ३२.३३

17- प्लक्षादेवी सुता राजन् महापुण्या सरस्वती। वनपर्व-८१.७

18- (क)तस्मिन् प्लक्षे स्थितां दृष्ट्वा मार्कण्डेयो महामुनिः।
प्रणिपत्य तदा मूर्ध्ना तुष्टावाथ सरस्वतीम्॥ वामन-३२.५
(ख) नदी प्रवाह संयुक्ता कुरुक्षेत्रं विवेश ह।। नारदीय पु. २.६४.१७-१८

19- वेदमीमांसा - आचार्यः लक्ष्मीदत्तदीक्षितः, दिल्ली १९८०
20- शतपथ ब्रा० ३.९.१ तथा ऐतरेयब्राह्मणः- ३.१
21- हिन्दू धर्मकोशः, डॉ० राजबलीपाण्डेयः, लखनऊ १९७८

* * *